"तदोग्रितारं चेदीनां भवांस्तमवमंस्त मा ।
निहन्स्वरैरनेकपदे य उदात्तः स्वरानिव ॥")
तन्त्रीकण्ठोत्थितनिषादादिसप्तध्वनिः । सुर इति भाषा । यथा,—
निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥"
इत्यमरः । १ । ७ । १ ॥

निषादादयः सप्त तन्त्रीसमुत्थाः कण्ठसमुत्थाश्च स्वराः स्वरशब्दवाच्याः । निषादादिकदम्बादि यथाक्रममिति स्थितमिति । नारदोऽप्याह ।
"षड्जं रौति मयूरो हि गावो नर्द्दन्ति चर्षभम् ।
अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम् ।
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ।
अश्वश्च धैवतं रौति निषादं रौति कुञ्जरः ॥"
इति ।

अन्योऽप्याह ।
"स स्वरो यः श्रुतिस्थाने स्वनन् हृदयरञ्जकः ॥"
"षड्जर्षभगान्धारौ मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः ॥
मयूरवृषभच्छागक्रौञ्चकोकिलवाजिनः ।
मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥"
इति ॥

एते च समदाः पञ्चमं गायन्ती । तथा च विशाखिलः ।
"अश्वस्तु धैवतं सोऽपि मत्तः पञ्चमसंज्ञकम् ।
निषादन्तु गजो गर्ज्जत्युन्मदोऽसौ सपञ्चममिति ॥"
भरतोऽप्याह ।
"षड्जञ्च पञ्चमञ्चेति मयूरो नदति द्विधा ।
अश्वाद्या धैवतादींश्च प्राहुर्मत्ताश्च पञ्चममिति ॥"

निषीदन्ति स्वरा अस्मिन्निति निषादः सदेराधारे घञ् गौक इति पत्वम् । तथा च ।
"निषीदन्ति स्वरा अस्मिन्निषादस्तेन हेतुना ।
अशेषसन्धिविषयं स हि व्याप्यावतिष्ठते ॥
ऋषति ऋतुं ऋषभः ऋषी श गतौ नाम्नीति कभः ।
"वायुः समुद्गतो नाभेः कण्ठशीर्षसमुद्गतः ।
नदत्यृषभवद्यस्मात्तेनैष ऋषभः स्मृतः ॥"इति ।
गन्धानां समूहो गान्धं ष्णः स्वरान्तस्य गान्धं इयर्त्ति गान्धारः ऋर्त्ति गत्यां ढात् षश्चिति अण् ।
"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः ।
नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥"
इति ।

गान्धारोऽभिजनोऽस्येति गान्धार इत्यन्ये ।
षड्भ्यो जायते षड्जः इनजनादिति डः ।
"नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः ।
षड्भ्यः संजायते यस्मात्तस्मात् षड्ज इति स्मृतः ॥" इति ।
मध्ये नाभिदेशे भवो मध्यमः । तत्राप्यचिरदचिरेत्यादिना मः ।

"तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः ।
नाभिप्राप्तो महानादो मध्यमस्तेन स स्मृतः ॥"
इति ।

धीमद्भिर्गीयते इति धैवतः ढश्चेकादिति ष्णः मनीषादित्वात् मस्य वः । धीयतेऽयमिति विकारसंघेति ष्णो वा । स्वरान् धयतीति वा । धेट पाने नाम्नीति धैवतः ।
"अभिसन्धयते यस्मात् स्वरांस्तेनैष धैवतः ।
स तु तावत्प्रधानत्वात् ललाटे व्यवतिष्ठते ॥"
इति पञ्चानां स्वराणां पूरणः पञ्चमः । नो मट्टादेर्म्मोड़िति मट् ।
वायुः समुद्गतो नाभेरुरो हृत्कण्ठमूर्द्धसु ।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते ॥"
इति ।

स्वरन्ति शब्दायन्ते स्वराः स्वृ ऋ शब्दोपतापयोः पचादित्वादन् । इति भरतः ॥ * ॥
अपि च ।
"स स्वरो यः श्रुतिस्थाने स्वरन् हृदयरञ्जकः ॥
षड्जऋषभगान्धारा मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः ॥
मयूरवृषभच्छागीक्रोष्टुकोकिलवाजिनः ।
मतङ्गाश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥
ऋषभं चातको वक्ति धैवतञ्चापि दर्द्दुरः ।"
इति केचित् ॥

"वायुः संमूर्च्छितो नाभेर्नाद्याय हृदयस्य च ।
पार्श्वयोर्म्मस्तकस्यापि यथा षड्जः प्रजायते ।
नाभिमूलाद्यदा वर्ण उत्थितः कुरुते ध्वनिम् ।
वृषभस्येव निर्याति हेलया ऋषभः स्मृतः ॥
नाभेः समुद्गतो वायुर्गन्धं श्रोत्रे च चालयन् ।
सशब्दस्तेन निर्याति गान्धारस्तेन कथ्यते ॥
मध्यमो मध्यमस्थानात् शरीरस्योपजायते ।
नाभिमूलाच्च गम्भीरः किञ्चित्तारः स्वभावतः ॥
प्राणोऽपानः समानश्च उदानो व्यान एव च ।
एतेषां समवायेन जायते पञ्चमः स्वरः ॥
गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्धगः पुनः ।
धावन्निव च यो याति कण्ठदेशं स धैवतः ॥
षड्जादयः षड़ेतेऽत्र स्वराः सर्व्वे मनोहराः ।
निषीदन्ति यतो लोके निषादस्तेन कथ्यते ॥*॥
चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।
ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके ॥"* ॥

संपूर्णस्वराः । ष ऋ ग म प ध नि । षाड़वाः निषादोज्झिताः । ष ऋ ग म प ध । औड़वस्वराः ऋ-प-वर्ज्जिताः । ष ग म ध नि । संपूर्णरागाः सप्तभिः स्वरैर्यथा नाटवसन्तादयः । षाड़वरागाः षड्भिः स्वरैर्यथा मल्लारादयः । अधुना स्वरप्रस्तारः ।
"क्रमेणैव स्वराः स्थाप्याः पूर्व्वपूर्व्वपरादधः ।
मूलक्रमः क्रमात् पृष्ठे पुरस्थपरिवर्त्तिनः ॥
स चेदुपरि तत्पूर्व्वं इत्थं प्रस्तारणक्रमः ॥" * ॥
अथ स्वरप्रस्तारे पिङ्गलवन्नष्टोद्दिष्टमेरुपताकासूचीसप्तसागरप्रभृतयः सन्ति ग्रन्थविस्तारभयान्नोक्ताः ।

"कंसारेर्व्वंशिकावाद्ये स्वराः सप्त चकासिरे ।"
इति शुभङ्करकृतसङ्गीतदामोदरः ॥"*॥*॥

अकारादिवर्णाः । इति मेदिनी ॥ तस्य नामान्तरं अच् २ । इति वोपदेवः ॥ मात्रा ३ । इति स्वरोदयः ॥ ते च ह्रस्वदीर्घप्लुता भवन्ति यथा,—
"एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम् ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥

स्वरवर्णा यथा । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः । एतेषां उत्पत्तिस्थानानि यथा । अवयं ए-ह-क-ख-ग-घ-ङाः कण्ठ्याः । इवयं च-छ-ज-झ-ञ-शा ए-ऐ यास्तालव्याः । ऋवयं ट-ठ-ड-ढ-ण-र-षा मूर्द्धन्याः । ऌवयं त-थ-द-ध-न-ल-सा वो दन्त्याः । उवयं प-फ-ब-भ-म-वा ओ-औ ओष्ठ्याः । इति मुग्धबोधव्याकरणम् ॥ ए-ह-क-ख-ग-घ-ङा इत्येकपदोक्त्या एषां उत्पत्तिस्थानं कण्ठमुक्त्वा पश्चात् ए ऐ इत्युभयं तालव्यकार्य्यार्थं तालव्यमध्येऽपि ए-ऐ-या इति भिन्नपदे पठितवान् । ओ औ इत्युभयमोष्ठकार्य्यार्थमोष्ठ्यमध्येऽपि ओ औ ओष्ठ्या इति भिन्नपदे पठितवान् । तालव्यकार्य्यञ्च इवर्णस्य समत्वात् गुण एकारः वृद्धिरैकारः । उकारस्य गुण ओकारः वृद्धिरौकारः । ननु ए ऐ ओ औ चतुर्णां स्वभावात् कण्ठजातानामपि तालव्यौष्ठ्यकार्य्यकारित्वं कथमिति चेन्न यतः कुन्त्या प्रसूतस्य कर्णस्य राधाप्रतिपालनात् राधेयत्वं संगच्छते । इति तट्टीकायां दुर्गादासः ॥ * ॥

अन्यच्च ।
"मातृकायां स्वराः प्रोक्ताः स्वराः षोड़शसङ्ख्यया ।
तेषां द्वावन्तिमौ त्याज्यौ चत्वारश्च नपुंसकाः ॥
शेषा दश स्वरास्तेषु स्यादेकैको द्विके द्विके ।
ज्ञेया अतोऽस्वरात्पञ्च क्रमात्पञ्च स्वरोदये ॥
स्वरा हि मातृकोद्धारा मात्राव्याप्तं जगत्त्रयम् ।
तस्मात् स्वरोद्भवं सर्व्वं त्रैलोक्यं सचराचरम् ॥
अकारादिस्वराः पञ्च ब्रह्माद्याः पञ्चदेवताः ।
निवृत्त्याद्याः कलाः पञ्च इच्छाद्यं शक्तिपञ्चकम् ॥
मयाद्याश्च क्रमेदाश्च धराद्यं भूतपञ्चकम् ।
ग्रन्थाद्या विषयास्ते च कामवाणा इतीरिताः ।
पिण्डं पदं तथा रूपं रूपातीतं निरञ्जनम् ।
स्वरभेदे स्थितं ज्ञानं ज्ञायते गुरुतः सदा ॥
अकारादिस्वराः पञ्च तेषामष्टौ भिदास्त्वमूः ।
मात्रावर्णौ ग्रहो जीवो राशिर्भं पिण्डयोगकौ ॥
प्रश्नमिष्टं भाषते येन येनागच्छति शब्दितः ।
तत्र नामाद्यवर्णे या मात्रा मात्रास्वरः स हि ॥"
इति मात्रास्वरचक्रम् ॥ * ॥
"कादिहान्तान् लिखेद्वर्णान् स्वराधो ङ-ञ-णोज्झितान् ।
तिर्य्यक् पङ्क्तिक्रमेणैव पञ्चत्रिंशत् प्रकोष्ठके ॥
नरनामादिमो वर्णो यस्मात् स्वरादधः स्थितः ।